# Dattatreya aShTachakrabIjastotram

# શ્રીદત્તાત્રેય અષ્ટચક્રબીજસ્તોત્રમ્

## Document Information

Text title : datta aShTachakrabIja

File name : dattAShTachakrabIja.itx

Category : deities_misc, dattatreya, stotra, shankarAchArya

Location : doc_deities_misc

Transliterated by : Dinkar Deshpande

Proofread by : Dinkar Deshpande

Latest update : April 25, 2010, April 2, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 8, 2022

*sanskritdocuments.org*

# શ્રીદત્તાત્રેય અષ્ટચક્રબીજસ્તોત્રમ્

શ્રીદત્તષટ્ચક્રસ્તોત્રમ્ અજપાજપસ્તોત્રં ચ ।

શ્રીગણેશાય નમઃ । શ્રી ગુરવે નમઃ ।
અથ ધ્યાનમ્ ।
દિગમ્બરં ભસ્મસુગન્ધલેપનં
    ચક્રં ત્રિશૂલં ડમરું ગદાં ચ ।
પદ્માસનસ્થં ઋષિદેવવન્દિતં
    દત્તાત્રેયધ્યાનમભીષ્ટસિદ્ધિદમ્ ॥

ૐ મૂલાધારે વારિજપત્રે ચતુરસ્રં (સચતુષ્કે)
    વંશંષંસં વર્ણવિશાલં સુવિશાલમ્ ।
રક્તં વર્ણં શ્રીગણનાથં ભગવન્તં
    દત્તાત્રેયં શ્રીગુરુમૂર્તિં પ્રણતોઽસ્મિ ॥ ૧॥ (મૂલાધાર)

સ્વાધિષ્ઠાને ષટ્દલપત્રે તનુલિઙ્ગે
    બાલાન્તેતદ્વર્ણવિશાલં સુવિશાલમ્ ।
(વાદિં લાન્તં વર્ણવિશેષં સુવિશેષમ્ ।)
પીતં વર્ણં વાક્પતિરમણં દ્રુહિણં તં (વાક્પતિરૂપં, દુહિલાન્તં)
    દત્તાત્રેયં શ્રીગુરુમૂર્તિં પ્રણતોઽસ્મિ ॥ ૨॥ (સ્વાધિષ્ઠાન)

નાભૌપદ્મં પત્રદશાઙ્કં ડફવર્ણં (નાભૌસ્થાને પત્રદશાબ્દે)
    લક્ષ્મીકાન્તં ગરુડારૂઢં નરવીરમ્ । (મણિપૂરે ।)
નીલંવર્ણં નિર્ગુણરૂપં નિગમાન્તં (નિગમાક્ષં)
    દત્તાત્રેયં શ્રીગુરુમૂર્તિં પ્રણતોઽસ્મિ ॥ ૩॥ (મણિપૂર)

હૃત્પદ્માંતે દ્વાદશપત્રે કઃ વર્ણે (કણ્ઠવર્ણે)
    શમ્ભોશૈવં પૂર્ણમયન્તં શશિવર્ણમ્ । (શમ્ભોશેશં જીવવિશેષં સ્મરયન્તમ્ ।)
(સૃષ્ટિસ્થિત્તં કુરુવન્તં શિવશક્તિં
    અનાહતાંતે વૃષભારૂઢં શિવરૂપમ્ ।)

સ્વર્ગસ્થિત્યં કુરુવિન્દૂતં શિવશક્તિં (કુર્વાણં ધવલાંગં)
    દત્તાત્રેયં શ્રીગુરૂમૂર્તિં પ્રણતોઽસ્મિ ॥ ૪ ॥ (અનાહત)

કણ્ઠસ્થાને ચક્રવિશુદ્ધે કમલાન્તે
    ચન્દ્રાકારે ષોડશપત્રે સ્વરવર્ણે ।
માયાધીશં તૈજસરૂપં ભગવંતં (જીવશિવં તં નિજમૂર્તિં)
    દત્તાત્રેયં શ્રીગુરૂમૂર્તિં પ્રણતોઽસ્મિ ॥ ૫॥ (વિશુદ્ધ)

આજ્ઞાચક્રે ભૃકુટિસ્થાને દ્વિદલાન્તે (અગ્નિશ્ચક્રે)
    હં સં બીજં જ્ઞાનસમુદ્રં ગુરૂમૂર્તિઃ । (હં ક્ષં, ગુરૂમૂર્તિં)
વિદ્યુત્વર્ણં જ્ઞાનમયં તં વિરુપાક્ષં (નિટિલાક્ષં)
    દત્તાત્રેયં શ્રીગુરૂમૂર્તિં પ્રણતોઽસ્મિ ॥ ૬॥ (આજ્ઞા)

મૂર્ધ્નિસ્થાને વારિજપત્રે શશિબીજં
    શુભ્રં વર્ણં પત્રસહસ્રં સુવિશાલમ્ । (લલનાખ્યે ।)
હં બીજાખ્યં વર્ણસહસ્રં તુરિયં તં (તુર્યાંતં)
    દત્તાત્રેયં શ્રીગુરૂમૂર્તિં પ્રણતોઽસ્મિ ॥ ૭॥ (સહસ્રાર)

બ્રહ્માનન્દં બ્રહ્મમુકુન્દં ભગવન્તં
    બ્રહ્મજ્ઞાનં બ્રહ્મમયં તં સ્વયમેવમ્ । (જ્ઞાનમયં)
(સત્યં જ્ઞાનં સત્યમનન્તં ભગરૂપમ્ ।)
બ્રહ્માત્માનં બ્રહ્મમુનીદ્રં ભસિતાભં (પરમાત્માનં બ્રહ્મમુનીદ્રં ભસિતાઙ્ગં)
    દત્તાત્રેયં શ્રીગુરૂમૂર્તિં પ્રણતોઽસ્મિ ॥ ૮॥ (પૂર્ણબ્રહ્મસ્વરૂપ)

શાન્તાકારં શેષશયાનં સુરવન્દ્યં
    કાન્તાનાથં કોમલગાત્રં કમલાક્ષમ્ ।
ચિન્તારત્નં ચિદ્ઘનપૂર્ણં દ્વિજરાજ્યં (દ્વિજરાજં)
    દત્તાત્રેયં શ્રીગુરૂમૂર્તિં પ્રણતોઽસ્મિ ॥ ૯॥

ચિતઓંકારં ધ્વનિનાદે ચ સ્વચ્છન્દે
    આકારાન્તેઽક્ષરવણીતે ગુણરૂપે ।
વેદાન્તાર્થં જ્ઞાનસ્વરૂપં નિજબોધં
    દત્તાત્રેયં શ્રીગુરૂમૂર્તિં પ્રણતોઽસ્મિ ॥ ૯॥

ઇતિ શ્રી અજપાતન્ત્રે દત્તાત્રેયસ્તોત્રં સમ્પૂર્ણમ્ । શુભં ભવતુ ।
(ઇતિ શ્રીમદ્શઙ્કરાચાર્યવિરચિતં શ્રીદત્તાત્રેય અષ્ટચક્રબીજસ્તોત્રં સમ્પૂર્ણમ્ ।)
શ્રીદત્તષટ્ચક્રસ્તોત્રમ્ ।

અજપાજપસ્તોત્રમ્

Based on the variations and composition consistency,
we are not sure if this is correctly attributed to
Shankaracharya. It is not found in his well established
complete works.

Encoded and proofread by
Dinkar Deshpande, Sunder Hattangadi, NA

---

*Dattatreya aShTachakrabIjastotram*
pdf was typeset on June 8, 2022

Please send corrections to *sanskrit@cheerful.com*